International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2020; 6(3): 78-80
© 2020 IJSR
www.anantaajournal.com
Received: 07-01-2020
Accepted: 09-02-2020

**कृष्णप्रसादः. के. एन्**
शोधछात्रः, संस्कृत-विभागः, बेङ्गळूरु-विश्वविद्यालयः, बेङ्गळूरु., कर्नाटक, भारत

**Corresponding Author:**
**कृष्णप्रसादः. के. एन्**
शोधछात्रः, संस्कृत-विभागः, बेङ्गळूरु-विश्वविद्यालयः, बेङ्गळूरु., कर्नाटक, भारत

# अनुभवामृत-ग्रन्थे नीतिश्लोकाः

**कृष्णप्रसादः. के. एन्**

## प्रस्तावना

संस्कृतवाङ्मयं तु अपारम् । वेदादारभ्य अस्य वाङ्मयस्य विस्तरणकार्यम् अहर्निशं प्राचलत्, प्रचलति, प्रचलिष्यति च । अत्र रामायणादि-काव्यानि, पुराणानि, नीतिश्लोकसंग्रहाः, लघु-कवन-सङ्कलनानि, मनुस्मृत्यादि-स्मृतिग्रन्थाः, आस्तिकनास्तिक-दर्शनानि इत्यादीनि च दृश्यन्ते । भारतीयतत्त्वज्ञाने आस्तिक-नास्तिकदर्शनभेदं दृश्यते । चार्वाक-जैन-बौद्धाः नास्तिकदर्शनानि । न्यायवैशेषिके सांख्ययोगौ पूर्वोत्तरमीमासेति षडास्तिकदर्शनानि । तत्र उत्तरमीमांसेति आध्यात्मविद्येति वेदान्तः प्रसिद्धः वर्तते । वेदाःसकलतन्त्राणां, सकलविद्यानां, सकलज्ञानानामाधाराः सन्ति । अनेकदर्शनानां च प्रमाणभूताः वेदाः चत्वारः सन्ति, यथा ऋग्वेदः, यजुर्वेदः, सामवेदः अथर्वणवेदः च । प्रत्येकस्मिन् वेदे चत्वारः विभागाः सन्ति, यथा संहिता,ब्राह्मणम्, आरण्यकम्, उपनिषदिति । तत्र वेदानाम् अन्तभागत्वात्, सारभूतभागत्वात्, निर्णायकभागत्वात् च उपनिषदां वेदान्तः इति नामान्तरं श्रूयते । अत्र ईश-केन-कठ-इत्यादयः उपनिषदः प्रसिद्धाः सन्ति । एषां उपनिषदां मतं, सारं, तत्त्वं च स्वग्रन्थैः स्पष्टीकुर्वन् श्रीमदादिशङ्कराचार्यः अद्वैतवेदान्ताचार्यः प्रसिद्धः । सः उपनिषदां, ब्रह्मसूत्रस्य,भगवद्गीतायाः च इति प्रस्थानत्रयाणां भाष्यं विलिख्य, मुमुक्षूणां सिद्ध्यै प्रेरकः अभवत् । एतैः सह विवेकचूडामणिः इत्यादीन् अनेकप्रकरणग्रन्थान् अपि रचितवान् श्रीशङ्करः ।

**शास्त्रैकदेशसम्बद्धं शास्त्रकारान्तरे कृतम् ।**
**आहुः प्रकरणं नाम ग्रन्थभेदो विपश्चिदः ॥ इति प्रकरणग्रन्थस्य लक्षणम् ।**

शास्त्रस्य कश्चनाशंकथनेन मुख्यग्रन्थातिरिक्तः प्रकरणं कथ्यते । शङ्कराचार्यानन्तरमपि अनेकाद्वैतवेदान्तशास्त्रज्ञाः अपि नैकप्रकरणग्रन्थान् रचितवन्तं । यथा सदानन्दस्य 'वेदान्तसारः', माधवाचार्यस्य 'पञ्चदशी', धर्मराजाध्वरीन्द्रस्य 'वेदान्तपरिभाषा' इत्यादयः अनेके प्रकरणग्रन्थाः वेदान्तसागरे रत्नमणयः इव भान्ति । 'ब्रह्म सत्यं जगन्मिथ्या, जीवो ब्रह्मैव नापरः' इति घोषवाक्याधारिते अद्वैतवेदान्तदर्शने अष्टदशशतमानेऽपि [$18^{th}$ century] अनेकप्रकरणग्रन्थाः रचिताः सन्ति । एतेषु प्रकरणग्रन्थेषु श्रीमद्परमहंसेन बालकृष्णब्रह्मानन्दराजयोगिना विरचितं अद्वैतवेदान्तप्रकरणग्रन्थम् 'अनुभवामृतम्' अपि अन्यतमम् । अस्य अप्रकटितकृतेः द्वे तालिके लब्धे स्तः । प्रथमा तालिका तेलुगुलिप्यां लिखिता, तमिलुनाडुराज्यस्य चन्नईनगरस्य अडियार् ग्रन्थालये लब्धा । द्वितीया च नन्दिनागरीलिप्यां लिखिता कर्नाटकराज्यस्य मैसूरुनगरस्य प्राच्यविद्यासंशोधनालये च लब्धा । द्वयोः तालिक्योः प्रतिचित्रम् [photo] स्वीकृत्य तद्द्वारा मम विद्यावारिधिकार्यं [Ph.D] कुर्वन्नस्मि । अस्मिन् ग्रन्थे वेदान्तदर्शनसिद्धान्तानां विचारेण सह अनेके नीतिश्लोकाः अपि सन्ति ।

चराचराः इति विभक्ते जीवगणे अचरजीवाः वृक्षाः उद्भिजाः भवन्ति । चराः तु प्राणिनः पक्षिणः कीटाः सन्ति । ते जरायुजाः, स्वेदजाः, अण्डजाः च । एतेषु प्राणिषु मानवः बुद्धिमान् जीवी इति ज्ञातोऽयं विषयः । तस्य विवेचनाशक्तिः इतरप्राणिभ्यः मनुष्यमुत्तमं कृता । किं, कदा,कथं वा कर्तव्यमिति विवेचनं, अनुशासनं, क्रमपालनं, सामाजिकजीवनम् इत्यादयः गुणाः मनुष्यस्य एव सन्ति । कर्तव्याकर्तव्येति विचारिते सति नीतिकथाः, नीतिश्लोकाः च दरीदृश्यन्ते । मानवः इतरेभ्यः कष्टं न यच्छेत्, आनन्दमेव यच्छेत्, स्वयं च सुखी भवेदिति नीतिश्लोकानामाशयः । एवं नीति-बोधकाः अनेके श्लोकाः अनुभवामृत-ग्रन्थेऽपि सन्ति । तेषां विवरणं संक्षिप्ततया अत्र प्रदत्तम् ।

**ज्ञानार्जनम्**

*निस्त्वग्रम्बाफलं यद्वाऽनिस्त्वगिक्षुर्यथा तथा ।*
*अनुष्णक्षीरवत्सर्वैः सेव्यं ह्यनुभवामृतम् ॥*

यदा वयं एकं ग्रन्थं पठामः तस्य क्रमः एवं –प्रथमं रम्बाफलं [कदलीफलं] यथा बहिस्था त्वक् विहाय सेव्यते तथा ग्रन्थे अनपेक्ष्यं विहाय अपेक्ष्यं एव स्वीकर्याय् । द्वितीयं यथा इक्षुदण्डं त्वक्सहितं चर्वितं कृत्वा तद्रसं च सेव्यते तथा अपेक्ष्यानुपेक्षे सम्यक्चर्वणं कृत्वा, मन्थनं कृत्वा जानीयात् । तृतीयं यथा क्षीरं उष्णं कृत्वा तदनन्तरं शीतलं कृत्वा [pasteurize] पिबेत् तथा कालक्रमेण च जानीयात् । एवं अनुभवामृतमित्यादिग्रन्थाः क्रमत्रयेण ज्ञातव्याः ।

*स शास्त्रसारं जानति ज्ञातारं पृच्छति स्वयम् ।*
*करोति सङ्गं साधूनां तद्वदाचरति व्रतम् ॥*

यः शास्त्रसारं, शास्त्ररहस्यं, शास्त्रतत्त्वं वा जानाति, तथापि स्वयं अन्यान् ज्ञातॄन् पृच्छति । ज्ञानदाहः एवं भवेत् । "अहं सर्वं जानामि" इति गर्वः मास्तु । तथा मैत्रिकरणसमयेऽपि साधुभिः साकं एव स्नेहं कुर्यात् । साधूनां व्रतं, व्यवहारः वा कथं तथैव व्यवहरेत् स उत्तमजनः ।

*स सद्गुरूणां कारुण्य- पात्रं भवति भक्तिमान्।*
*भवबीजानि भर्जित्वा स याति परमं पदम् ॥*

यः अध्येता सद्गुरूणां प्रीतिपात्रः भूत्वा, गुरुकारुण्यं च लब्ध्वापि गुरुभक्तियुतः भवति सः तस्य वासनारूप-भव-कर्माणि इति बाजानि भर्जयित्वा, नाशयित्वा परमं गतिं मोक्षं याति । अत्र गुरुसेवया ज्ञानार्जनं कुर्यादिति विवक्षितम् ।

**परद्रव्य-निस्पृहता**

*परद्रव्यं न स्पृशति क्वचिदश्नादिहीनवान् ।*
*स्वनिन्दया स्वयं नान्यं निन्दति क्वचिदप्ययम् ॥*

कदाचिद् जीवने दारिद्रेण आहार-गृह-वसनादिन्यूनातिन्यूनसौकर्याः न लभ्यन्ते चेदपि यः परद्रव्यं, परधनं वा न स्पृशति, इच्छति, वाञ्चति स एव अधिकारी अस्य ग्रन्थस्य ।अत्र परद्रव्य-निस्पृहतागुणं वर्णितम् । इतरे जनाः तं निन्दन्त्यपि सः शास्त्राधिकारी तान् न निन्दति इति निन्दासहिष्णतागुणमपि अत्र द्रष्टुं शक्यते ।

**समचित्तत्वम्**

*न खिद्यते महादुःखे भूपो भूत्वा न हृष्यति ।*
*धैर्यशाली दरिद्रोऽपि नोन्मत्तो धनवानपि ॥*

यः महादुःखेऽपि विचलितमनः न भवति । भूपः राजा सुखसौकर्यादिवान् भूत्वा अपि न अत्यन्तसुखी भवति । दारिद्रेऽपि कष्टेऽपि आहारादिविहीनेऽपि धैर्यवान् स्थिरचित्तवान् भवति । धन-कनक-वस्त्र-वाहनादि-संपद्प्राप्तौ अपि उन्मत्तः, धनेन मूढः वा न भवति । एवं 'सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ' इति गीतावाक्यानुसारं सः समवित्तवान् भवति । सः अधिकारी भवति ।

*निन्दया हृदि न क्षुब्धो वन्दनैः नातिहर्षिणः।*
*यस्सत्त्वेऽधिकारी स्यात्सुखदुःखसमानधीः ॥*

यः निन्दनया हृदये मनसि वा क्षुब्धः (विचलितः) न भवति । वन्दनैः (गौरवप्रदानेन) वा अतिहर्षी (सन्तुष्टः) न भवति । अयं सुखदुःखे समाने पश्यति । सः सुखदुःखयोः समानमनस्कः । सः सत्त्वे सच्छास्त्रवेदान्ते अधिकारी भवति ।

*सुखदुःखात्मकं सर्वमीश्वराज्ञेति धैर्यवान् ।*
*न दुःखितो न हृषितो विरक्तस्साधिकारवान् ॥*

अस्मिन् संसारे सुखप्रदं, दुःखप्रदं वा किमपि वा कार्यं भविष्यति तत्सर्वं देवस्य (ईश्वरस्य) एव आज्ञया अनुज्ञया वा भविष्यति इति यः धैर्यवान् (स्थिरमनस्कः) भवति । तेन कार्येण सः अत्यन्त-दुःखयुतः अथवा सुखयुतः वा न भवति । सः एव विरक्तः रागरहितः भवति । सः एव अधिकारी अस्य शास्त्रस्य । अत्रापि समचित्तत्वमिति विशेषगुणं वर्णितम् ।

*माता पितापि बन्धुश्च सती च सुत एव च ।*
*निन्दन्तु तेऽपि वन्दन्तु मुमुक्षुस्समचित्तवान् ॥*

तदा माता पिता सती बान्धवाः इतरजनाः च योगिनं निन्दन्तु (तर्जयन्तु) अथवा स्तुवन्तु (स्तुतिं कुर्वन्तु) । योगी निन्दास्तुती सममेव स्वीकरोति । निन्दया खिन्नः, स्तुत्या उन्मत्तः च न भवति । अतः सः समचित्तवान् ।

**पर-हनन-निन्दा**

*सर्पग्रस्तोऽपि मण्डूको मक्षिकां छेत्तुमिच्छति ।*
*तथैव मृत्युना ग्रस्तो नरोऽन्यं हन्तुमिच्छति ॥*

एकदा एकः मण्डूकः एकां मक्षिकां छेत्तुं, भक्षितुं वा इच्छति । परं तदेव मण्डूकं एकः सर्पः भक्षितुं गृहीतवान् । यथा सर्पेण म्रियमाणः मण्डूकः कीटं भक्षितुमिच्छति तथा स्वयं मृत्युपाशे बद्धः नरः अन्यं नरं हन्तुमिच्छतीति विपर्यासः । स्वयं मृत्युपाशविमोचनं कथमिति न जानन् सः अन्यस्य हरणं कथं वा करिष्यति ? एवं परेषां मारणकार्यस्य (हननस्य) निन्दा अत्र कृता ।

**स्व-पर-हितचिन्तनम्**

*स वै मुमुक्षुस्स सुखेच्छुः योगी स साधकश्चैवमिह प्रवर्तते ।*
*करोति पुण्यं न करोति पापं दुःखं न कस्मै कुरुते कदापि ॥*

यः पुण्यमेव,शुभकार्याणि एव करोति, न कदापि अशुभं, पापं वा करोति, कस्यापि दुःखं न ददाति । एवं सः मुमुक्षुः मोक्षेच्छुः, सः योगी योगाभ्यासनिरतः, स साधकः इह वेदान्तशास्त्रे प्रवर्तते । अत्र स्वस्य अन्यस्य च कृते सदा पुण्यप्रदः सः योगीति अत्र स्वपरहितचिन्तनमुक्तम् ।

*अन्यैरपकृतोऽप्येष मन्यते प्राक्कृतंफलम् ।*
*नान्येभ्यः कुरुते क्वापि कदाप्यपकृतं नरः॥*

तदा सत्पुरुषः अन्यैः परजनैः अपकृतः भूत्वा, अपकारं वञ्चनं वा प्राप्यापि तेषां कृते अपकारं न कदापि करोति । सत्पुरुषः एतद् स्वप्राक्कृतं प्रारब्धं कर्मफलमिति चिन्तयति अन्येषामपकारमिति न चिन्तयति क्षम्यते च । अत्र अपकारभावनायाः राहित्यं दृष्टम् ।

**भ्रान्तिः**

*नावि स्थितश्च नद्यां नौश्चलतीत्थं न जानाति मूढः ।*
*तत्तीरस्थवृक्षा अभियान्त्येवं मन्यते भ्रान्त्या ॥*

नद्यां नौकायां यः स्थितः सः एवं वदति “ नौका, अहं च न चलावः । तीरस्थाः वृक्षाः आगच्छन्ति गच्छन्ति, चलन्ति” इति । सः मूढः अज्ञानेन अथवा भ्रान्त्या एवं वदति । एवं भ्रान्तिः न स्यात् । अत्र भ्रान्तेः निदर्शनं दत्तम् ।

**मनोनिग्रहम्**

*माता पाययति क्षीरं बालो रौतीतिविन्मनः ।*
*स्वहितं नैव जानाति विश्वासेन वशं नयेत् ॥*

यथा माता रोधनं कुर्वन्तं, स्वहितं अजानन्तं, पुत्रं विश्वासेन वशं नीत्वा, क्षीरं पाययति । एवं वयं स्वहितं अजानत् मनः विश्वासेन वशं नीत्वा तत्त्वज्ञानाय प्रयतामहै । अत्र मनः बालेन सः तुल्यं, आत्मा च मात्रा तुल्यः । अत्र मनोनिग्रहं कथं करणीयमिति निदर्शनात्मकमुक्तम् ।

**नीचानां निन्दा**

*राक्षसः स्वगृहस्थानां अन्येषां कर्कशकविः ।*
*सर्वान्धिक्कुरुते मत्तो युवा शुनकसन्निभः ॥*

यः स्वयुवावस्थासामर्थ्यात् यः शुनकः इव उन्मत्तः भवति यः सर्वान् सर्वोक्तवचनानि च धिक्कुरुते, न श्रुणोति, पालयति वा सः स्वग्रहे स्थितानां मातापितॄणां राक्षसः इव क्रूरगुणयुतः तथान्येभ्यः स्वग्रामस्थितेतरजनेभ्यः कर्कशकविरिव पीडाप्रदः भवति।अत्र नीचस्य निन्दा कृता ।

**सत्पुरुषलक्षणम्**

*आध्यात्मवासना यस्य तच्छास्त्रस्यैव चिन्तनम्।*
*विवेकी विरतस्साधुःसद्गुणी गुरुसेवकः॥*

यस्य आध्यत्माचिन्तनया आध्यात्मवासना एव भवति, यस्य शास्त्रसैव चिन्तनं भवति सः विवेकवान् बुद्धिमान्, सर्ववैशयिकसुखात् विरतः विरक्तः, सद्गुणयुतः, यः गुरुं सेवते सः एव साधुः भवति । एवं साधोः लक्षणमत्र स्पष्टमभिहितम् ।

*दुर्मानमत्सरावेशैः विहीना मौनतत्पराः।*
*नियमादियुताः दान्ताः दम्बदर्पविवर्जिताः॥*

ये दुर्मानः (गर्वः), मत्सरः (अन्यशुभद्वेषबुद्धिः), आवेशः (कोपः), दम्बः (अत्याहःमानम्), दर्पः (मदः) इत्यादि दुर्गुणैः विहीनाः, शान्तिमन्तः, यमनियमादियोगानुष्ठानुरताः, अनुशासनयुताः, शमदमादिषड्गुणयुताः ये सत्पुरुषाः ते शास्त्रेऽधिकारिणः । अत्र सुगुणदुर्गुणानां विवरणं कृतम् ।

*यः पुमान्मनसा वाचा वपुषाण्वपि दुष्कृतम्।*
*न स्मरत्यपि नो वक्ति न करोति स योग्यकः ॥*

यः नरः मनसा वाचा काया इति त्रिकरणशुद्धः अस्ति सः मनसा अणुप्रमाणमपि दुष्कृतं पापं न स्मरति चिन्तयति, सः वाचा न वक्ति, वपुषा न करोति । स एव योग्यः, शास्त्राधिकारी, उत्तमजनोऽपि भवति ।

*स्वेनैव साम्यं मनुतेऽन्यजन्तुं नाशो न देहोऽस्ति निजं ममत्वम् ।*
*देहादिकं सर्वमुदासकार्यं वदेत्प्रियं स्यात्स सुखेच्छुरेष ॥*

यः अन्यं जन्तुं (प्राणीं) स्वेन समं मनुते (चिन्तयति) । देहस्य नाशं भवति अतः ममत्वं न स्यात् । देहगृहधनकनकादिकं सर्वं वैषयिकं सुखं उदासकार्यं (उदासीनभावनया त्यक्तव्यम्) । सर्वदा प्रियवाक्यानि एव वक्तव्यानि । यः स्वस्य अन्येषां च सुखं इच्छति सः सुखेच्छुः भवति । एवं सत्पुरुषस्य लक्षणमुक्तम् ।

एवं बालकृष्णब्रह्मानन्दराजयोगी विरचिते अनुभवामृताख्ये ग्रन्थे ज्ञानार्जनं, सत्पुरुषलक्षणं, मनोनिग्रहं, समचित्तत्वमित्यादि उत्तमगुणानां वर्णनं श्लोकैः लिखितम् । नीचानां, परहननकर्तॄणां, भ्रान्तियुक्तानां च विवरणेन, दुर्जनानां दुर्गुणानां च निन्दापि कृता । ग्रन्थेऽस्मिन् इतोऽपि अनेके नीतिश्लोकाः निबद्धाः सन्ति । एतान् नीतिश्लोकान् ज्ञात्वा, अस्माकं जीवने च उपयुज्य, अनुभवानां द्वारा अमृतत्वं वयं प्राप्नुमः इति ’अनुभवामृत’ग्रन्थस्य आशयः।

**संदर्भ**:


1. तालपत्र संख्या 70264
2. तालपत्र संख्या 4619
3. अनुभवामृतम् अध्याय-नान्दी श्लोक सं ५
4. अनुभवामृतम् अध्याय-१ श्लोक सं ३५
5. अनुभवामृतम् अध्याय-१ श्लोक सं ४०
6. अनुभवामृतम् अध्याय १ श्लोक सं ४२
7. अनुभवामृतम् अध्याय १ श्लोक सं ४४
8. भगवद्गीता अध्याय २ श्लोक सं ३८
9. अनुभवामृतम् अध्याय १ श्लोक सं ३१
10. अनुभवामृतम् अध्याय १ श्लोक सं ३२
11. अनुभवामृतम् अध्याय १ श्लोक सं ३०
12. अनुभवामृतम् अध्याय २ श्लोक सं ४०
13. अनुभवामृतम् अध्याय ६ श्लोक सं १५
14. अनुभवामृतम् अध्याय १ श्लोक सं २८
15. अनुभवामृतम् अध्याय १२ श्लोक सं ३०
16. अनुभवामृतम् अध्याय नान्दी श्लोक सं ८
17. अनुभवामृतम् अध्याय २ श्लोक सं ८५
18. अनुभवामृतम् अध्याय २ श्लोक सं ४६
19. अनुभवामृतम् अध्याय २ श्लोक सं १८
20. अनुभवामृतम् अध्याय १ श्लोक सं २७
21. अनुभवामृतम् अध्याय ६ श्लोक सं १८